# Shri Dharmika Stotram

# શ્રીધાર્મિકસ્તોત્રમ્

## Document Information

Text title : Shri Dharmika Stotram

File name : dhArmikastotram.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, stotra

Location : doc_vishhnu

Author : shatAnandamuni

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીધાર્મિકસ્તોત્રમ્

(વસન્તતિલકા વૃત્તમ્)
શ્રીવાસુદેવ-વિમલામૃત-ધામવાસં
નારાયણં નરકતારણ-નામધેયમ્ ।
શ્યામં સિતં દ્વિભુજમેવ ચતુર્ભુજં ચ
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૧॥

શિક્ષાર્થમત્ર નિજભક્તિમતાં નરાણાં
એકાન્ત-ધર્મમખિલં પરિશીલયન્તમ્ ।
અષ્ટાઙ્ગયોગ-કલનાશ્ચ મહાવ્રતાનિ
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૨॥

શ્વાસેન સાક-મનુલોમ-વિલોમવૃત્ત્યા
સ્વાન્તર્બહિશ્ચ ભગવત્યુરુધા નિજસ્ય ।
પૂરે ગતાગત-જલામ્બુધિનોપમેયં
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૩॥

બાહ્યાન્તરિન્દ્રિયગણ-શ્વસનાધિદૈવ-
વૃત્યુદ્ભવ-સ્થિતિલયાનપિ જાયમાનાન્ ।
સ્થિત્વા તતઃ સ્વમહસા પૃથગીક્ષમાણં
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૪॥

માયામયા-કૃતિતમોઽશુભવાસનાનાં
કર્તું નિષેધમુરુધા-ભગવત્સ્વરૂપે ।
નિર્બીજ-સાઙ્ખ્યમત-યોગગ-યુક્તિભાજં
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૫॥

દિવ્યાકૃતિત્વ-સુમહસ્ ત્વસુવાસનાનાં
સમ્યગ્વિધિં પ્રથયિતું ચ પતૌ રમાયાઃ ।
સાલમ્બસાઙ્ખ્યપથ-યોગસુયુક્તિભાજં

ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૬॥

કામાર્ત્ત-તસ્કર-નટવ્યસનિ-દ્વિષન્તઃ
સ્વસ્વાર્થ-સિદ્ધિમિવ ચેતસિ નિત્યમેવ ।
નારાયણં પરમયૈવ મુદા સ્મરન્તં
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૭॥

સાધ્વી-ચકોર-શલભાસ્તિમિ-કાલકણ્ઠ-
કોકા નિજેષ્ટવિષયેષુ યથૈવ લગ્નાઃ ।
મૂર્તૌ તથા ભગવતોઽત્ર મુદાતિલગ્નં
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૮॥

સ્નેહાતુરસ્ત્વથ ભયાતુર આમયાવી
યદ્વત્ ક્ષુધાતુરજનશ્ચ વિહાય માનમ્ ।
દૈન્યં ભજેયુરિહ સત્સુ તથા ચરન્તં
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૯॥

ધર્મસ્થિતૈ-રુપગતૈર્બૃહતા નિજૈક્યં
સેવ્યો હરિઃ સિતમહઃસ્થિતદિવ્યમૂર્તિઃ ।
શબ્દાદ્યરાગિભિરિતિ સ્વમતં વદન્તં
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૧૦॥

સદ્ગ્રન્થનિત્ય-પઠનશ્રવણાદિ-સક્તં
બ્રાહ્મીં ચ સત્સદસિ શાસતમત્ર વિદ્યામ્ ।
સંસારજાલ-પતિતાખિલ-જીવબન્ધો
ત્વાં ભક્તિધર્મતનયં શરણં પ્રપદ્યે ॥ ૧૧॥

ઇતિ શ્રીશતાનન્દમુનિવિરચિતં શ્રીધાર્મિકસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Dharmika Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*